# Shiva Ashtakam

# शिवाष्टकम्

## Document Information

Text title : Shivashtakam 6

File name : shivAShTakam6.itx

Category : shiva, aShTaka

Location : doc_shiva

Author : Murari Gupta

Proofread by : PSA Easwaran

Description/comments : From the book Krishna Chaitanya Charita

Latest update : February 22, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 7, 2022

*sanskritdocuments.org*

# शिवाष्टकम्

नमो नमस्ते त्रिदशेश्वराय
भूतादिनाथाय मृडाय नित्यम् ।
गङ्गातरङ्गोत्थितबालचन्द्र-
चूडाय गौरीनयनोत्सवाय ॥ १॥

सुतप्तचामीकरचन्द्रनील-
पद्मप्रवालाम्बुदकान्तिवस्त्रैः ।
सुनृत्यरङ्गेष्टवरप्रदाय
कैवल्यनाथाय वृषध्वजाय ॥ २॥

सुधांशुसूर्याग्निविलोचनेन
तमोभिदे ते जगतः शिवाय ।
सहस्रशुभ्रांशुसहस्ररश्मि-
सहस्रसञ्जित्त्वरतेजसेऽस्तु ॥ ३॥

नागेशरत्नोज्ज्वलविग्रहाय
शार्दूलचर्मांशुकदिव्यतेजसे ।
सहस्रपत्रोपरि संस्थिताय
वराङ्गदामुक्तभुजद्वयाय ॥ ४॥

सुनूपुरारञ्जितपादपद्म-
क्षरत्सुधाभृत्यसुखप्रदाय ।
विचित्ररत्नौघविभूषिताय
प्रेमानमेवाद्य हरौ विधेहि ॥ ५॥

श्रीराम गोविन्द मुकुन्द शौरे
श्रीकृष्ण नारायण वासुदेव ।
इत्यादिनामामृतपानमत्त-
भृङ्गाधिपायाखिलदुःखहन्त्रे ॥ ६॥

श्रीनारदाद्यैः सततं सुगोप्य-
  जिज्ञासितायाशु वरप्रदाय ।
तेभ्यो हरेर्भक्तिसुखप्रदाय
  शिवाय सर्वगुरवे नमो नमः ॥ ७॥

श्रीगौरीनेत्रोत्सवमङ्गलाय
  तत्प्राणनाथाय रसप्रदाय ।
सदा समुत्कण्ठगोविन्दलीला-
  गानप्रवीणाय नमोऽस्तु तुभ्यम् ॥ ८॥

एतत् शिवस्याष्टकमद्भुतं महत्
  शृण्वन् हरिप्रेम लभेत शीघ्रम् ।
ज्ञानञ्च विज्ञानमपूर्ववैभवं
  यो भावपूर्णः परमं समादरम् ॥ ९॥

इति शिवाष्टकं सम्पूर्णम् ।

*Shiva Ashtakam*

pdf was typeset on January 7, 2022

Please send corrections to *sanskrit@cheerful.com*